"नवजलकणसेकाच्छीततामादधान:
कुसुमभरनतानां लासक: पादपानाम् ॥")
लासकी, स्त्री, नर्त्तकी । इत्यमर: ॥
लासिका, स्त्री, ( लासोऽस्त्यस्या इति । लास+ ठन् । ) नर्त्तकी । इत्यमर: ॥
लास्फोटनी, स्त्री, आस्फोटनी । वेधनिका । इत्यमरटीकायां रायमुकुट: ॥
लास्यं, क्ली, (लस् + "ऋहलोर्ण्यत् ।" ३।१।१२४ । इति ण्यत् । ) नृत्यम् । इत्यमर: ॥ तौर्य्यत्रिकम् । इति मेदिनी ॥ भावाश्रयं नृत्यम् ।ताललयाश्रयं नृत्यम् । इति भरत: ॥
"पुंनृत्यं ताण्डवं प्राहु: स्त्रीनृत्यं लास्यमुच्यते ।"
इति सङ्गीतनारायणे नारदसंहिता ॥
( यथा, महाभारते । १ । ६८ । १० ।
"सम्भोगस्नेहचातुर्य्यैर्हावलास्यमनोहरै: ।
राजानं रमयामास तथा रेमे तथैव स: ॥")
लास्य:, पुं, ( लास्यमस्त्यस्येति । लास्य+अच् । ) नर्त्तक: । इति शब्दरत्नावली ॥
लास्यकं, क्ली, (लास्यमेव । स्वार्थे कन् ।) नृत्यम् । इति शब्दरत्नावली ॥
लास्या, स्त्री, ( लास्यमस्त्यस्या इति । लास्य+ अच् । टाप् । ) नर्त्तकी । इति शब्दरत्नावली ॥
लिकुचं, क्ली, ( लक्यते आस्वाद्यते इति । लक्+ बाहुलकात् उच: । पृषोदरादित्वात् इत्वम् । ) चुक्रम् । इति राजनिर्घण्ट: ॥ ( डहु: । अस्य गुणा यथा,—
"पित्तश्लेष्मप्रकोपीणि कर्कन्धुलिकुचान्यपि ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥ )
लिकुच:, पुं, लकुच: । इत्यमर: ॥
लिक्षा, स्त्री, लिक्षा । इति शब्दरत्नावली ॥
लिक्षा, क्ली, ( लिश गतौ+बाहुलकात् स: । सच कित् । इत्युणादिवृत्तौ उज्ज्वल: । ३ । ६६ । ) यूकाण्डम् । इत्यमर: ॥ लिकि इति भाषा । इत्यमरभरतौ ॥ तत्पर्य्याय: । लिक्का २ लीक्षा ३ लीक्का ४ लिक्षिका ५ । इति शब्दरत्नावली ॥ ( यथा,—
"बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामत: ॥"
इति वाभटे निदानस्थाने चतुर्द्दशेऽध्याये ॥ )
परिमाणविशेष: । यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रज: ।
तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षप: ॥"
इति शब्दचन्द्रिका ॥
सयकारकवर्गद्वितीयवतीत्यपि पाठ: ॥
लिख, इ ऌपि । इति कविकल्पद्रुम: ॥ ( भ्वा०-पर०-सक०-सेट् । ) इ, लिङ्खते । ऌपि गतौ । इति दुर्गादास: ॥
लिख, श लेखने । इति कविकल्पद्रुम: ॥ ( तुदा०-पर०-सक०-सेट् ।) श, लिखति पुस्तकं लेखक: । अयं विभाषया कुटादिरिति केचित् । तेन लिखितं विश्वसृजोऽपि शक्तिहानिरिति । लिखितव्यं लेखितव्यं लिखनं इत्यादि सिद्धम् । इति दुर्गादास: ॥
लिख:, त्रि, (लिखतीति । लेख+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति क: । ) लेखक: । इति लिखधातो: कप्रत्ययेन निष्पन्नम् ॥
लिखनं, क्ली, लेखनम् । लिपि: । इत्यमरटीकायां सारसुन्दरी ॥ ( यथा, मार्कण्डेये । ५१ । २२ ।
"प्रसिद्धमन्त्रलिखनात् शस्त्रमाल्यादिधारणात् ।
विशुद्धगेहावसथादनायासाश्च वै द्विज ! ॥")
विधिलिपिरखण्डनीया यथा,—
"यस्य यल्लिखनं पूर्व्वं यत्र काले निरूपितम् ।
तदेव खण्डितुं शक्यं नाहञ्च को विधि: ॥
विधातुश्च विधाताहं येषां यल्लिखनं कृतम् ।
ब्रह्मादीनाञ्च क्षुद्राणां न तत् खण्ड्यं कदाचन ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्याय: ॥
लिखितं, क्ली, ( लिख+भावे क्त: । ) लिपि: । इत्यमर: ॥ लेखनम् । इति भरत: ॥ ( लिख+ कर्म्मणि क्त: । ) लिखितपत्रादौ, त्रि । यथा,—
"प्रमाणं लिखितं भुक्ति: साक्षिणश्चेति
कीर्त्तितम् ॥"
इति मिताक्षरायां याज्ञवल्क्य: ॥
मुनिविशेषे, पुं । यथा, आह्निकतत्त्वे याज्ञवल्क्य: ॥
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजका: ॥"
लिख्या, स्त्री, परिमाणविशेष: । यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रज: ।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षप: ॥"
इति शब्दचन्द्रिका ॥
लिग, इ गतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् । ) इ, लिङ्गते । इति दुर्गादास: ॥
लिग, इ क चित्रे । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-सक०-सेट् । ) इ क, लिङ्गयति शब्दं क्लीनपुंसके: शाब्दिक: चित्रं करोतीत्यर्थ: । इति दुर्गादास: ॥
लिगु, क्ली, ( लिङ्गति विषयात् विषयान्तरं गच्छतीति । लिग+"खरुशङ्कुपीयुनीलङ्गुलिगु ।" उणा० १ । ३७ । इति कुप्रत्ययेन साधु ।) मन: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥
लिगु:, पुं, ( लिग+कु: ।) मूर्ख: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥ भूप्रदेश: । मृग: । इति नानार्थरत्नमाला ॥
लिङ्गं, क्ली, ( लिङ्ग्यते अनेन इति । लिङ्ग+घञ् । अभिधानात् क्लीवलिङ्गत्वम् ।) चिह्नम् । (यथा, महाभारते । १ । २ । १२ ।
"येन लिङ्गेन यो देशो युक्त: समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिण: ॥" )
शेफ: । इत्यमर: ॥ अनुमानम् । सांख्योक्तप्रकृति: । ( यथा, सांख्यकारिकायाम् । ५५ ।
"तत्र जरामरणकृतं दु:खं प्राप्नोति चेतन:
पुरुष: ।
लिङ्गस्याविनिवृत्तेस्तस्माद्दु:खं स्वभावेन ॥"
प्रकृतिकार्य्ये विकृतिश्च । यथा, तत्रैव । १० ।
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥"
विशेषस्तु तत्र द्रष्टव्य: ।) शिवमूर्त्तिविशेष: । इति मेदिनी । गे, २३ ॥ साध्यम् । व्यक्तम् । पुंस्त्वादि: । इति त्रिकाण्डशेष: ॥ (यथा, मनु: । ५ । १३६ ।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयो: सप्त दातव्या मृद: शुद्धिमभीप्सता ॥")
सामर्थ्यम् । यथा,—
"यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् ।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रह: ॥"
इति तिथ्यादितत्त्वे एतत्कारिकाव्याख्यायां रघुनन्दन: ॥ * ॥ अथ शेफार्थस्य लिङ्गस्य पर्य्याय: । शिश्न:२ स्मरस्तम्भ: ३ उपस्थ: ४ मदनाङ्कुश: ५ कन्दर्पमुषल: ६ शेफ: ७ मेहनम् ८ शेफ: [स]९ मेढ्र: १० लागु: ११ ध्वज: ११ रागलता १३ अङ्ग: १४ । इति शब्दरत्नावली ॥ लाङ्गूलम् १५ साधनम् १६ सेफ: १७ कामाङ्कुश: १८ । इति जटाधर: ॥ * ॥ लिङ्गमूले वादिलान्तवर्णयुक्तस्वाधिष्ठाननामकषड्दलपद्ममस्ति । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे हेमवर्णाभं व स वर्णचतुर्दलम् ।
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ॥
वादिलान्तषड्वर्णेन युक्तस्वाधिष्ठानसंज्ञकम् ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदु: ॥"
इति तन्त्रम् ॥ * ॥
अस्याधिष्ठातृदेवतादिर्यथा ।
"प्रजन: सर्व्वभूतानामुपस्थोऽध्यात्ममुच्यते ।
अधिभूतं तथा शुक्रं दैवतञ्च प्रजापति: ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥ * ॥
अस्य शुभाशुभलक्षणं यथा,—
"स्वल्पे लिङ्गे च धनवान् स्याच्च पुत्त्रादि-
वर्ज्जित: ।
स्थूललिङ्गो दरिद्र: स्याद् दु:खी कष्टयुतो भवेत् ॥"
इति गारुडे ६३ अध्याय: ॥ * ॥
अपि च ।
"महद्भिरायुराख्यातं ह्रस्वलिङ्गो धनी नर: ।
अपत्यरहितश्चैव स्थूललिङ्गो धनोज्झित: ॥"
महद्भिर्नाडुभिरिति शेष: ।
"मेढ्रे वामनते चैव सुतार्थरहितो भवेत् ।
वक्रेऽन्यथा पुत्त्रवान् स्यात् दारिद्र्यं विनते
त्वध: ॥
अल्पे तु तनयो लिङ्गे शिरालेऽथ सुखी नर: ।
स्थूलग्रन्थियुते लिङ्गे भवेत् पुत्त्रादिसंयुत: ॥"
इति गारुडे ६६ अध्याय: ॥
अन्यच्च ।
"दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्द्धन: ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपति: ॥
कर्कशै: कठिनैर्लिङ्गै: परदाररत: सदा ।
रमते च सदा दासीं निर्द्धनो भवति ध्रुवम् ॥
कृशलिङ्गेन सम्भोग्य रक्तलिङ्गेन भूपति: ।
परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत् ॥
कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।